শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬৩

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৬৩

*গোৱৰ্ধনোদ্ধরণৱৰ্ণনম্*

দদৃশিরে কিল ততক্ষণমক্ষত-
স্তনিতজৃম্ভিতকম্পিতদিক্তটাঃ।
সুষমযা ভৱদঙগতুলাং গতা
ৱ্ৰজপদোপরি ৱারিধরাস্ত্ৱযা॥ ১॥

ৱিপুলকরকমিশ্ৰৈস্তোযধারানিপাতৈ-
ৰ্দিশি দিশি পশুপানাং মণ্ডলে দণ্ড্যমানে।
কুপিতহরিকৃতান্নঃ পাহি পাহীতি তেষাং
ৱচনমজিত শৃণ্ৱন্ মা বিভীতেত্যভাণীঃ॥ ২॥

কুল ইহ খলু গোত্ৰো দৈৱতং গোত্ৰশত্ৰো-
ৰ্ৱিহতিমিহ স রুন্ধ্যাত্ কো নু ৱঃ সংশযোস্মিন্।
ইতি সহসিতৱাদী দেৱ গোৱৰ্দ্ধনাদ্ৰিং
ত্ৱরিতমুদমুমূলো মূলতো বালদোৰ্ভ্যাম্॥ ৩॥

তদনু গিরিৱরস্য প্ৰোদধৃতস্যাস্য তাৱত
সিকতিলমৃদুদেশে দূরতো ৱারিতাপে।
পরিকরপরিমিশ্ৰান্ ধেনুগোপানধস্তা-
দুপনিদধদধত্থা হস্তপদ্মেন শৈলম্॥ ৪॥

ভৱতি ৱিধৃতশৈলে বালিকাভিৰ্ৱযস্যৈ-
ৰপি ৱিহিতৱিলাসং কেলিলাপাদিলোলে।
সৱিধমিলিতধেনূরেকহস্তেন কণ্ডূ-
যতি সতি পশুপালাস্তোষমৈষন্ত সৰ্ৱে॥ ৫॥

www.prapatti.com

অতিমহান্ গিৰিৰেষ তু ৰামকে
    কৰসৰোৰুহি তং ধৰতে চিৰম্।
কিমিদমদভুতমদ্ৰিবলং ন্বিতি
    ত্বদৱলোকিভিৰাকথি গোপকৈঃ॥ ৬ ॥

অহহ ধাৰ্ষ্ট্যমমুষ্য ৱটোৰ্গিৰিং
    ৱ্যথিতবাহুৰসাৱৱৰোপয়েত্।
ইতি হৰিস্তৱয়ি বদ্ধৱিগৰ্হণো
    দিৱসসপ্তকমুগ্ৰমৱৰ্ষয়ত্॥ ৭ ॥

অচলতি ত্বয়ি দেৱ পদাত্ পদং
    গলিতসৰ্ৱজলে চ ঘনোতকৰে।
অপহৃতে মৰুতা মৰুতাম্পতি-
    স্তৱদভিশঙকিতধীঃ সমুপাদ্ৰৱত্॥ ৮ ॥

শমমুপেয়ুষি ৱৰ্ষভৰে তদা
    পশুপধেনুকুলে চ ৱিনিৰ্গতে।
ভুৱি ৱিভো সমুপাহিতভূধৰঃ
    প্ৰমুদিতৈঃ পশুপৈঃ পৰিৰেভিষে॥ ৯ ॥

ধৰণিমেৱ পুৰা ধৃতৱানসি
    ক্ষিতিধৰোদ্ধৰণে তৱ কঃ শ্ৰমঃ।
ইতি নুতস্ত্ৰিদশৈঃ কমলাপতে
    গুৰুপুৰালয় পালয় মাং গদাত্॥ ১০ ॥

**********

www.prapatti.com